देवस्याम्बुजिनीपतेः समुदयं जिज्ञासमाने प्रिये
वामाक्षो वसनाञ्चलैः श्रवणयोर्नीलोत्पलं निह्नुते ॥”* ॥

यथा च ।
“नखाङ्कितमुरःस्थलेऽधरतले रदस्य क्षतं
च्युता वकुलमालिका विगलिता च मुक्तावली ।
रतान्तसमये मया सकलमेतदालोकितं
स्मृतिः क्व च पतिः क्व च क्व च तवालि शिक्षाविधिः ॥”

अपि च ।
“कान्ते तल्पमुपागते विगलिता नीवी स्वयं बन्धनात्
वासश्च श्लथमेखलागुणधृतं किञ्चित् नितम्बे स्थितम् ।
एतावत् सखि वेद्मि केवलमहो तस्याङ्गसङ्गे पुनः
कोऽसौ कास्मि रतञ्च कीदृशमिति स्वल्पापि मे न स्मृतिः ॥” * ॥

मध्याप्रगल्भे मानावस्थायां प्रत्येकं त्रिविधे । धीरा अधीरा धीराधीरा चेति । व्यङ्ग्यकोपप्रकाशा धीरा । अव्यङ्ग्यकोपप्रकाशा अधीरा । व्यङ्ग्याव्यङ्ग्यकोपप्रकाशा धीराधीरा । इयांस्तु विशेषः । मध्यमायाः धीरायाः कोपव्यञ्जिका गीः । अधीरायाः परुषवाक् । धीराधीराया वचनरुदिते प्रकाशिके । प्रौढ़ाधीरायास्तु रतावौदास्यम् । अधीरायास्तर्ज्जनताड़नादिः । धीराधीराया रतावौदास्यं तर्ज्जनादि च कोपप्रकाशकम् । यत्तु धीरादिभेदः स्वीयाया एव न परकीयाया इति प्राचीनलिखनं तदाश्मासात् धीरात्वमधीरात्वं तदुभयञ्च माननियतमेव परकीयाया मानश्च नेति वक्तुमशक्यत्वात् परकीयाया मानस्तेषामप्यावश्यकत्वादिति भावः ॥ * ॥ मध्या धीरा यथा,—

“लीलालिपुञ्जे व्रजतो निकुञ्जे
स्फारा बभूवुः श्रमवारिधाराः ।
देहे समीहे भवतो विधातुं
धीरं समीरं नलिनीदलेन ॥” * ॥

मध्या अधीरा यथा,—,
“ज्ञातस्ते निशि जागरो मम पुनर्नेत्राम्बुजे शोणिमा
निष्पीतं भवता मधु प्रविततं व्याघूर्णितं मे मनः ।
भ्राम्यद्भृङ्गघने निकुञ्जभवने लब्धं त्वया श्रीफलं
पञ्चेषुः पुनरेष मां बहुतरैः क्रूरैः शरैः हन्तति ॥” * ॥

मध्या धीराधीरा यथा,—
“कान्तानुरागचतुरोऽसि मनोहरोऽसि
नाथोऽसि किञ्च नवयौवनभूषितोऽसि ।
इत्थं निगद्य सुदृशा वदने प्रियस्य
निश्वस्य बाष्पलुलिता निहिता दृगन्ताः ॥”*॥

प्रौढ़ा धीरा यथा,—
“नो तल्पं भजसे न जल्पसि सुधाधारानुकारा गिरो
दृक्पातं कुरुषे न वा परिजने कोपप्रकाशच्छलात् ।
इत्थं केतकगर्भगौरि दयिते कोपस्य संगोपनं
किं स्यादेव न चेत् पुनः सहचरो कुर्व्वीत साचि स्मितम् ॥”*॥

प्रगल्भा अधीरा यथा,—
“प्रतिफलमवलोक्य स्वीयमिन्दोः कलायां
हरशिरसि परस्यास्त्रासमाशङ्कमाना ।
गिरिशमचलकन्या तर्ज्जयामास कम्प-
प्रचलवलयवेल्लत्कान्तिभाजा करेण ॥”* ॥

प्रगल्भा धीराधीरा यथा,—
“तल्पोपान्तमुपेयुषि प्रियतमे साचीकृतग्रीवया
काकुव्याकुलवाचि साचिहसितस्फूर्ज्जत्कपोलश्रिया ।
हस्तन्यस्तकरे पुनर्मृगदृशा लाक्षारसाक्षालित-
श्रोणोपह्नमयूखमांसलरुचो विस्फारिता दृष्टयः ॥”*॥

एते धीरादिषड्भेदा द्विविधा । धीरा ज्येष्ठा कनिष्ठा च । अधीरा ज्येष्ठा कनिष्ठा च धीराधीरा ज्येष्ठा कनिष्ठा च इत्यपि क्वचित् पाठः एते धीरादित्रयो भेदात् द्विविधा भवन्ति । ज्येष्ठा कनिष्ठा च । परिणीतत्वे सति भर्त्तुरधिकस्नेहा ज्येष्ठा । परिणीतत्वे सति भर्त्तुर्न्यूनस्नेहा कनिष्ठा । अधिकस्नेहासु न्यूनस्नेहासु सामान्यवनितादिषु नातिव्याप्तिः । परिणीतत्वपदेन व्यावर्त्तनात् । नापि परकीयायामतिव्याप्तिः । भर्त्तृपदेन तद्व्यावृत्तेः । धीरा ज्येष्ठा कनिष्ठा च यथा,—

“एकस्मिन् शयने सरोरुहदृशोर्विज्ञाय निद्रां तयो-
रेकां पल्लवितावगुण्ठनपटामुत्कन्धरो दृष्टवान्
अन्यस्याः सविधं समेत्य निभृतं व्यालोलहस्ताङ्गुलि-
व्यापारैर्वसनाञ्चलञ्चपलयन् स्वापच्युतिं क्लृप्तवान् ॥”॥*॥

अधीरा ज्येष्ठा कनिष्ठा यथा,—
“अन्तःकोपकषायिते प्रियतमे पश्यन् घने कानने
पुष्पस्यावचयाय नम्रवदनामेकां समायोजयन् ।
अर्द्धोन्मीलितलोचनाञ्चलचमत्काराभिरामाननां
क्रोड़ाद्रीधरपल्लवां नववधूमन्यां समालिङ्गति ॥”

धीराधीरा ज्येष्ठा कनिष्ठा च यथा,—
“धैर्य्याधैर्य्यपरिग्रहग्रहिलयोरेणीदृशोः प्रीतये
रत्नद्वन्द्वमनन्तकान्तिरुचिरं मुष्टिद्वये न्यस्तवान् ।
एकस्याः कलयन् करे प्रथमतो रत्नं परस्याः प्रियो
हस्ताहस्तिमियात् स्पृशन् कुचतटीमानन्दमाविन्दति ॥”

इति रसमञ्जरी ॥

स्वूर्च्छ, वा विस्मृतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) दन्त्यादिः क्रुसी वकारयुक्तः । क्विपि राल्लोपे स्वूः स्वुरौ स्वुरः । वा स्वूर्च्छितं स्वूर्णं तेन । स्वूर्च्छति कथां मद्यपः । इति दुर्गादासः ॥

स्वृ, ञ शब्दोपतापयोः । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-शब्दे अक०-उपतापे सक०-वेट् ।) दन्त्यादिर्वकारोपधः । ञ, अस्वारीत् पिकः । अस्वार्षीत् खलं राजा । इति दुर्गादासः ॥

स्वृ, गि हिंसने । इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-सक०-अनिट् ।) दन्त्यादिर्वकारोपधः । तद्रहितोऽपीति केचित् । गि, स्वृणाति स्वूर्णः स्वूर्णिः । इति दुर्गादासः ॥

स्वेक, ऋ,ङ गतौ । इति कविकल्पद्रुमः ॥(भ्वा०-आत्म०-सक०-सेट् ।) वकारयुक्तः । ऋ, असिस्वेकत् । ङ, स्वेकते । इति दुर्गादासः ॥

स्वेच्छा, स्त्री, ( स्वस्य इच्छा । ) स्वकीयेच्छा । तत्पर्य्यायः । यदृच्छा २ स्वैरिता ३ । इति हेमचन्द्रः ॥ ( यथा, कथासरित्सागरे ।२५।४८।
“स च मत्स्योऽब्धिमध्येन तत्कालं स्वेच्छया चरन् ।
उत्स्थलद्वीपनिकटं जगाम विधियोगतः ॥”)

स्वेच्छामृत्युः, पुं, ( स्वेच्छया मृत्युर्यस्य । ) भीष्मः ॥ इति त्रिकाण्डशेषः ॥ स्वेच्छया मरणञ्च । तद्युक्ते, त्रि ॥

स्वेदः, पुं, ( स्विद्+घञ् । ) घर्म्मः इत्यमरः ॥ १ । ७ । ३३ ॥ स्वेदनम् । इति मेदिनी ॥ आवरा इति भाषा ॥ * ॥ उष्मा । तापः । अथातः स्वेदाध्यायं व्याख्यास्यामः । इति ह स्माह भगवानात्रेयः ।

“अथ स्वेदान् प्रवक्ष्यामि यैर्यथावत् प्रयोजितैः
स्वेदसाध्याः प्रशाम्यन्ति गदा वातकफात्मकाः ॥
स्नेहपूर्व्वप्रयुक्तेन स्वेदेनावजितेऽनिले ।
पुरीषमूत्ररेतांसि न सज्जन्ति कदाचन ॥
शुष्काण्यपि च काष्ठानि स्नेहस्वेदोपपादनैः ।
नमयन्ति यथान्यायं किं पुनर्ज्जीवतो नरान् ॥
रोगर्त्तुव्याधितापेक्षो नात्युष्णोऽतिमृदुर्न च ।
द्रव्यवान् कल्पितो देशे स्वेदः कार्य्यकरो मतः ॥
व्याधौ शीते शरीरे च महान् स्वेदो महाबले ॥
दुर्व्वले दुर्व्वलः स्वेदो मध्यमे मध्यमो हितः ॥*॥
वातश्लेष्मणि वाते वा कफे वा स्वेद इष्यते ।
स्निग्धरूक्षस्तथास्निग्धोऽरूक्षश्चाप्युपकल्पितः ॥
आमाशयगते वाते कफे पक्वाशयाश्रिते ।
रूक्षपूर्व्वो हितः स्वेदः स्नेहपूर्व्वस्तथैव च ॥
वृषणौ हृदयं दृष्टी स्वेदयेन्मृदु वा न वा ।
मध्यमं वंक्षणौ शेषमङ्गावयवमिष्टतः ॥
सुशुद्धैर्नक्तकैः पिण्ड्या गोधूमानामथापि वा ।
पद्मोत्पलपलाशैर्व्वा स्वेदः संवृत्य चक्षुषी ॥
मुक्तावलीभिः शीताभिः शीतलैर्भाजनैरपि ।
जलार्द्रैर्जलजैर्हस्तैः स्विद्यतो हृदयं स्पृशेत् ॥
शीतशूलव्युपरमे स्तम्भगौरवनिग्रहे ।
संजाते मार्द्दवे स्वेदे स्वेदनाद्विरतिर्म्मता ॥
पित्तप्रकोपो मूर्च्छा च शरीरसदनं तृषा ।
दाहः स्वेदोऽङ्गदौर्व्वल्यमतिस्विन्नस्य लक्षणम् ॥